ISSN:- 3021-9485 (P)

# व्याकरण–विशिष्टाद्वैतदर्शनपुराणाद्यभिमतमायाविमर्शः

**हरिलालः पौडेलः**

*उप-प्राध्यापकः, विश्वविद्यालयविद्यापीठम्, दाङ्गः*

hlpsharma2035@gmail.com

**शोधसारः**

*अनुसन्धानात्मकलेखोऽयं व्याकरण–विशिष्टाद्वैतदर्शनपुराणाभिमतमायाविषये विमर्शं कृत्वा तत्र समन्वयस्थापनोद्देश्येन विरचितोऽस्ति। शब्दानुशासनपरे व्याकरणदर्शनशास्त्रे शब्दसम्बद्धदार्शनिकचिन्तनक्रमे मायाविषयकचिन्तनमप्यागतं दृश्यते। वेदान्तदर्शनभेदेष्वन्यतमे विशिष्टाद्वैतवेदान्तदर्शने ब्रह्मणा सहैव मायापि बहुशः चर्च्यते। मायाविषये पुराणेष्वपि वर्णनं प्राप्यते। सा च ब्रह्मज्ञानावरोधिनी जीवमोहिनी च मन्यते। विविधशास्त्रेषु बहुशश्चर्चिताया मायायाः स्वरूपनिर्धारणे प्रतिशास्त्रं मतभिन्नता दृश्यत इति तत्तन्मतसमन्वये केन्द्रितोऽयं लेखः। तदर्थञ्च पुस्तकालयीयस्रोतोभ्यः सामग्रीसङ्कलनं विधाय तुलनात्मकविधिना समन्वयात्मकविधिना च विश्लेषणं विहितमत्र। विविधदर्शनचर्चाविषयीभूताया मायायाः स्वरूपं निर्धारयितुमनुसन्धानात्मकलेखेऽस्मिन् व्याकरण–विशिष्टाद्वैतदर्शनपुराणादीनां मायाविषयकमतानि विमृश्य तत्र मतसमन्वयान्वेषणञ्च कृत्वा यथाशास्त्रं समाधानं विहितम्। अत्र च गुणात्मकेऽनुसन्धाने मायाविषयकं व्याकरणदर्शनं, विशिष्टाद्वैतदर्शनं, वेदोपनिषत्पुराणवचनानि च सैद्धान्तिकपर्याधारत्वेन गृहीतानि। पुराणेषु माया नाम प्रकृतिर्विष्णुशक्तिश्चेत्युक्त्वा मायासञ्चालको नारायण इति वर्णितम्, देवीत्वेनापि महामाया वर्णिता। व्याकरणदर्शने वाक्यपदीयकारः शक्तिमेव चर्चयति। असदर्थप्रकाशनमेव मायेति स्वीकुर्वन्नागेशः ब्रह्मणः मायाविशिष्टत्वं, मायाया विष्णवधीनत्वं, तन्मूलत्वं, तल्लयश्चेति प्रतिपादयति। विशिष्टाद्वैतदर्शनेऽचिद्रूपा त्रिगुणात्मिका प्रकृतिरेव माया, सा च जगदुदयस्थितिलयकर्तुः परब्रह्मणः श्रीहरेः शक्तिरूपा, तदीयकार्ये सहयोगिनी चेति मन्यते। मायायाः कार्यमेव भगवत्स्वरूपतिरोधानं स्वस्वरूपभोग्यत्वबुद्धिश्च, अतो भगवन्मायया मोहितो जीवलोको भगवन्तं नाभिजानाति। मायाविमोचनोपायश्च भगवच्छरणागतिरेवेति तन्मतम्। प्राप्ततथ्यानां विश्लेषणेन च— प्रकृत्यपरपर्याया भगवच्छक्तिरूपा च त्रिगुणात्मिका माया जगन्मोहिन्यस्ति, सा चेश्वराधीनास्तीति मायाप्रभावादात्मानं विमोक्तुं भगवच्छरणागतिरावश्यकीति निष्कर्षोऽत्र स्थापितः।*

**शब्दकुञ्जी**

मायाविमर्शः, प्रकृतिः, शक्तिः, व्याकरणदर्शनम्, मतसमन्वयः।

**विषयपरिचयः**

व्याकरणं हि शब्दानुशासनशास्त्रं दर्शनशास्त्रञ्चास्ति। अत्र शब्दानुशासनप्रक्रियया सहैव दार्शनिकचिन्तनमपि प्राप्यते। अत एव व्याकरणशास्त्रं दर्शनशास्त्रमप्यस्ति। अत्र च शास्त्रे विविधदार्शनिकचिन्तनक्रमे

मायाविषयकचिन्तनमप्यागतं दृश्यते। ब्रह्मज्ञानं विना जीवस्य कल्याणं नास्तीति वेदान्तदर्शनं प्रतिपादयति (श्वेता.उ.,३/८), किन्तु मायामोहितो जीवो ब्रह्मज्ञानं कर्तुं न शक्नोति (श्रीमद्भगवद्गीता, ७/१३)। अतो ब्रह्मज्ञानावरोधिनी जीवमोहिनी च माया का ? सा कीदृशी शक्तिरस्ति ? तस्याश्चात्मानं विमुच्य स्वलक्ष्यं प्राप्तुं कथं शक्यत इति मायाविषयिणी जिज्ञासा तत्त्वबुभुत्सूनां हृदि स्वाभाविकरूपेण जागर्त्येव। यद्यपि व्याकरणशास्त्रस्य प्रमुखदार्शनिकसिद्धान्तः स्फोटवादोऽस्ति, न मायावादस्तथापि प्रसङ्गात्तत्र मायापि चर्चाविषयीभूतास्ति। तत्र स्फोटनिरूपणप्रसङ्गे, बौद्धार्थस्य वाच्यत्वनिरूपणप्रसङ्गे, अन्यत्र च कुत्रचित् मायायाः चर्चा विहितास्ति। माया ह्यखिलजगत्कारणस्य ब्रह्मणः शक्तिरूपेति यत्रतत्र प्रतिपाद्यते। वेदान्तेऽपि ब्रह्मणः सहैव मायाया अपि बहुशः चर्चा क्रियते। श्रीरामानुजाचार्यप्रतिष्ठापिते विशिष्टाद्वैतवेदान्तेऽपि मायाविषयकमतं प्राप्यते। अद्वैतवेदान्ते पुरोदृश्यमानं सर्वं जगत् मायैवेति मायावाद एव प्रसिद्धः। गीतायां ज्ञानस्य मोक्षस्य च बाधकत्वेन माया चर्च्यते। उपनिषत्स्वपि माया चर्चिता। वस्तुतो मायातत्त्वं किमित्यन्विष्य शास्त्रसम्मततया मायास्वरूपविमर्शने केन्द्रितोऽयमालेखः।

अत्र च विशेषतो विविधदर्शनचर्चाविषयीभूताया मायायाः स्वरूपं किम् ? सा कीदृशी शक्तिरस्ति ? तद्विषये व्याकरणदर्शनविशिष्टाद्वैतदर्शनपुराणादीनां मतं किम् ? तत्र समन्वयो भवति न वा ? भवति चेत्तत्तन्मतसमन्वयः कथं कर्तुं शक्यते ? मायायाश्चात्मानं विमोक्तुं कथं शक्यते ? इत्यादिका शोधप्रश्ना आसन्। दर्शनद्वयपरिचयपूर्वकं व्याकरणविशिष्टाद्वैतदर्शनवेदोपनिषत्पुराणादिचर्चिताया मायायाः स्वरूपविवेचनं तत्तन्मत–समन्वयान्वेषणञ्चास्यानुसन्धानात्मकलेखस्योद्देश्यम्।

माया नाम भगवच्छक्तिविशेषोऽस्ति, यस्या नामान्तरं प्रकृतिरित्यस्ति। मायाशक्त्यैव च परब्रह्म सृष्ट्यादिकं करोति। ब्रह्मशक्तिभूता च माया जीवस्य कृते बन्धहेतुर्भवति। मायामोहितो जीवो स्वस्वरूपं परब्रह्मस्वरूपञ्च ज्ञातुं न शक्नोति, अत एव सदा भवबन्धनबद्धो भवति। माया चेश्वराधीनास्तीति मायाप्रभावादात्मानं विमोक्तुं भगवच्छरणागतिरावश्यकीति शास्त्रसमन्वितो निष्कर्षोऽत्र स्थापितः।

## अध्ययनविधिः

अनुसन्धानमिदं मूलतः तुलनात्मकविधिं विश्लेषणात्मकविधिञ्चाधृत्य कृतम्। अस्मिन्ननुसन्धानेऽव–लम्बितोऽध्ययनविधिर्यथा–

### अनुसन्धानप्रकारः

अत्रानुसन्धाने हि व्याकरणदर्शन—विशिष्टाद्वैतदर्शनयोर्ग्रन्थानां वेदोपनिषत्पुराणादीनाञ्चाध्ययनेन प्राप्तानां दार्शनिकतथ्यानां तुलनात्मकं विश्लेषणं कृत्वा शब्दात्मको निष्कर्षः स्थापितोऽस्ति। अत एवेदं गुणात्मकमनुसन्धानमस्ति।

### अनुसन्धानस्य क्षेत्रं परिसीमा च

व्याकरणदर्शनं विशिष्टाद्वैतदर्शनं पुराणानि चेति त्रिकमप्यस्यानुसन्धानस्य मूलभूतं विषयक्षेत्रम्। सपुराणदर्शनद्वयाभिमतमायाविषयकचिन्तनञ्चास्यानुसन्धानस्य सीमा। एकस्मिँल्लघुलेखे सपुराणदर्शनद्वयग्रन्थानामध्ययनं विश्लेषणं तोलनञ्चासम्भवमिति विशिष्टाद्वैतदर्शनसम्बद्धानां श्रीभाष्य–गीताभाष्य–

वेदार्थसङ्ग्रह–यतीन्द्रमतदीपिकादिग्रन्थानां, व्याकरणदर्शनस्य वाक्यपदीय–वैयाकरणसिद्धान्तलघुमञ्जूषयोः, पुराणेषु ब्रह्मवैवर्त–श्रीमद्भागवत–विष्णु–वराहपुराणानां मार्कण्डेयपुराणान्तर्गतदुर्गासप्तसत्याश्चाध्ययनं कृत्वा सपुराणदर्शनद्वयाभिमतमायाविषयकमतानां तुलनात्मिकां समीक्षां कृत्वा समन्वयोऽन्विष्टः, तदर्थञ्च समन्वयकारितथ्यान्वेषणाय वेदोपनिषदादीनामप्यध्ययनं कृतम्। इत्थञ्चोपर्युक्तग्रन्थानाधृत्य व्याकरण–विशिष्टाद्वैतदर्शनपुराणाद्यभिमतमायाविमर्शेऽनुसन्धानमिदं केन्द्रितमिति एषैवास्यानुसन्धानस्य परिसीमा वर्तते।

**तथ्याङ्कसङ्कलनं तत्साधनानि च**

अत्र श्रीभाष्यादिभ्यो विशिष्टाद्वैतदर्शनसम्बद्धग्रन्थेभ्यः, वैयाकरणसिद्धान्तलघुमञ्जूषेत्यस्माद् व्याकरणदर्शनग्रन्थाद् वेदोपनिषत्पुराणादिभ्यश्च मायासम्बद्धानां तथ्यानां सङ्कलनं कृतमिति प्रायः प्राथमिकस्रोतस एव तथ्याङ्कसङ्कलनसाधनानि सन्ति।

**तथ्याङ्कविश्लेषणप्रक्रिया**

अत्र वाक्यपदीयात् वैयाकरणसिद्धान्तलघुमञ्जूषेत्यस्माद् व्याकरणदर्शनग्रन्थाद् विशिष्टाद्वैतदर्शनसम्बद्ध–ग्रन्थेभ्यश्च मायासम्बद्धानि तद्विचारपराणि च तथ्याङ्कानि सङ्कलय्य तेषां वर्णनं, तोलनं विश्लेषणञ्च कृत्वा समन्वितो निष्कर्षो निष्कासितो विद्यते। मूलतोऽत्र तथ्याङ्कविश्लेषणाय तुलनाविधिः विश्लेषणविधिः समन्वयविधिश्चावलम्बितः।

**अनुसन्धानस्य सैद्धान्तिकपर्याधारः**

अस्यानुसन्धानस्य विषयक्षेत्रं व्याकरणदर्शनं विशिष्टाद्वैतदर्शनञ्चेति दर्शनद्वयसम्बद्धं दार्शनिकचिन्तनमेवात्र सैद्धान्तिकपर्याधारत्वेन गृहीतम्। एतदतिरिक्तं द्वयोर्दर्शनयोर्मतसमन्वयाय सैद्धान्तिकपर्याधारत्वेन मायाविषयकानि वेदोपनिषदादिवचनानि *मायापदार्थ* इत्युपशीर्षके प्रस्तुतानि।

विश्लेषणक्रमे सङ्कलिततथ्यानां सन्दर्भस्रोतःप्रदर्शनाय गद्यात्मकाधुनिकग्रन्थानां कृते लेखकमितिपृष्ठपद्धतेः (एपीएपद्धतेः), वेदोपनिषत्पुराणादीनां प्राचीनग्रन्थानां सन्दर्भप्रदर्शनाय च यथावश्यकं संस्कृतवाङ्मये प्रचलिताया ग्रन्थाध्याय–श्लोकसंख्यापद्धतेः, ग्रन्थ–स्कन्धाध्याय–श्लोकसंख्यापद्धतेरन्यासाञ्च सम्बद्धग्रन्थप्रकृत्यनुरूपाणां पद्धतीनां प्रयोगः कृतोऽस्ति।

**व्याकरणदर्शनपरिचयः**

व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः पृथक्कृत्य विविच्यन्ते साधुशब्दा अनेनेति व्युत्पत्त्यैव व्याकरणं नाम शब्दसाधुत्वानुशासनपरकं शास्त्रमिति ज्ञायते। शब्दानुशासनमेवास्य प्रयोजनमिति पतञ्जलिना (१९९५ : १–७) महाभाष्ये प्रतिपादितम्। शब्दानुशासनप्रयोजनवत्यपि व्याकरणशास्त्रे गहनतमदार्शनिकचिन्तनमपि प्राप्यते। अत एव व्याकरणशास्त्रं दर्शनशास्त्रमप्यस्ति। व्याकरणशास्त्रस्य प्रमुखदार्शनिकसिद्धान्तश्च स्फोटवादः। स्फोटनिरूपणप्रसङ्गे चात्र मायाविषयकचिन्तनमपि प्रस्तुतं नागेशेन।

## विशिष्टाद्वैतदर्शनपरिचयः

षट्सु पौरस्त्यदर्शनेषु वेदान्तदर्शनमप्येकम् । तच्चाद्वैत–द्वैत–विशिष्टाद्वैतादिभेदेनानेकविधम्। तेष्वन्यतमस्य विशिष्टाद्वैतदर्शनस्य प्रतिष्ठापनं श्रीमद्भगवद्रामानुजाचार्येण श्रीभाष्यादिग्रन्थरत्नान् विरच्य कृतम्। दर्शनमिदं हि वेद–पुराणेतिहासाऽऽगमादिशास्त्रेषु प्राप्यते। बादरायणविरचितब्रह्मसूत्रेषु, बोधायनविरचितब्रह्मसूत्रवृत्तिषु, श्रीनाथमुनिविरचिते न्यायतत्त्वे, यामुनाचार्यविचितेषु गीतार्थसङ्ग्रह–सिद्धित्रय–महापुरुषनिर्णयादिग्रन्थेषु तस्य सारोद्धारः कृतः प्राप्यते (उपाध्यायः , २०३५ : १५५–१५८) । शेषावतारभगवद्रामानुजाचार्यविरचितश्रीभाष्यादिग्रन्थेषु च दर्शनमिदं प्रबलप्रामाणिकदर्शनस्वरूपेण प्रतिष्ठापितमस्ति । विशिष्टाद्वैतदर्शने हि सविशेषस्य = विशेषणसहितस्य ब्रह्मणोऽद्वैतत्वं प्रतिपाद्यते । ब्रह्मणो विशेषणरूपेण चित् = जीवः, अचित् = प्रकृतिश्च स्वीक्रियेते । तत्राचिद्रूपा त्रिगुणात्मिका प्रकृतिरेव मायेति विशिष्टाद्वैताभिमतं मतम्।

## मायापदार्थविमर्शः

माया नाम किं तत्त्वमस्तीति ज्ञातुं व्युत्पत्तिज्ञानपूर्वकं मायाशब्दस्यार्थो ज्ञातव्यो भवति । मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति माया। *माछाससिसूभ्यो यः।* ( उणादिः ४। १०९।) इति यः, *अजाद्यतः* (अष्टा ४।१।३ ) इति टाप्। अथवा माति विश्वमस्यां / मिमीते जानाति संख्यात्यनयेति माया मनीषादिः (शब्दकल्पद्रुमः, ए.सं.)। शब्दश्चायमनेकेऽर्थे ऋग्वेदादिषु प्रयुक्तो दृश्यते।

### ऋग्वेदे 'माया' शब्दप्रयोगस्तदर्थश्च

ऋग्वेदे बहुत्र विभिन्नेष्वर्थेषु 'माया' शब्दस्य प्रयोगः कृतो दृश्यते। *माययोर्ध्वां दधानः...*(ऋग्वेदः,१:१४४:१), *ते मायिनो ममिरे...*(ऋग्वेदः, १: १५९:४), *अधारयत् पृथिवीं विश्वधायसमस्तभ्नान्मायया...*(ऋग्वेदः, २:१७:५), *सु मायया द्यां वर्षयतमरुणामरेपसम्...*(ऋग्वेदः, ५:६३:६), *असुरस्य मायया* (ऋग्वेदः, ५:६३:७) *विश्वा हि माया...*(ऋग्वेदः , ६:५८:१), *मायाविनो ममिरे अस्य मायया...*(ऋग्वेदः, ९:८३:३) इत्यादिषु मन्त्रेषु मायाशब्दः प्रज्ञार्थे विद्यत इति तत्रत्यसायणभाष्याज्ज्ञायते। एवमेव *त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये...*(ऋग्वेदः, १:५१:५) इत्यत्र च ज्ञानार्थे कपटार्थे वा मायाशब्दः प्रयुक्तः, *आ वर्षिष्ठया... सुमायाः...* (ऋग्वेदः , १:८८: १), *त्वष्टा माया...*(ऋग्वेदः, १०:५३:९), इत्यादिषु कर्मार्थे, *मिनन्ता दस्योरशिवस्य माया...*(ऋग्वेदः ,१:११७:३), *याश्च माया मायिनां विश्वमिन्व त्वे...*(ऋग्वेदः, ३:२०:३), *स्वर्भानोरध यदिन्द्र माया...* (ऋग्वेदः ,५:४०:६), *यदेददेवीरसहिष्ट माया...* (ऋग्वेदः,७:९८:५) *दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा* (ऋग्वेदः,७:९९:४) इत्यादिषु छलयुक्तासुरशक्त्यर्थे, *मही मित्रस्य वरुणस्य माया चन्द्रेव...*(ऋग्वेदः, ३:६१:७) इत्यत्र प्रभार्थे, *दासानामिन्द्रो मायया...*(ऋग्वेदः, ४:३:२१), *चित्रेभिरभ्रैरूप... असुरस्य मायया* (ऋग्वेद, ५ : ६३:३), *माया वां मित्रावरुणा...* (ऋग्वेदः,५:६३:४) इत्यादिषु शक्तौ /सामर्थ्ये, *मायेत्सा ते यानि...*(ऋग्वेदः, १०:५४:२) इत्यत्र मिथ्यार्थे, *आभिर्हि माया उप दस्युमागान्मिह...*(ऋग्वेदः, १०:७३:५) इत्यत्र च छलार्थेऽयं शब्द इति तत्रत्यसायणभाष्यादवगम्यते (सायणभाष्यम् , १०:७३:५)।

इत्थञ्च ज्ञानार्थे/ प्रज्ञार्थे, कपटार्थे, कर्मार्थे, छलयुक्तासुरशक्त्यर्थे, प्रभार्थे, शक्त्यर्थे/ सामर्थ्यार्थे, मिथ्यार्थे, छलार्थे च ऋग्वेदे मायाशब्दः प्रयुक्तो दृश्यते।

**ऋग्वेदभाष्ये मायाविषयकव्याख्यानम्**

ऋग्वेदे मायाविषयकचर्चा प्राप्यते। तद्भाष्ये च सायणाचार्येण मायाविषयकव्याख्यानङ्कृतम्। *अहं रुद्रेभिर्वसुभिश्चरामि...* (ऋग्वेदः : १०:१२५:१)। *अहं सोममाहनसं बिभर्म्यहं त्वष्टारम् ...*(ऋग्वेदः : १०.१२५:२)। इति मन्त्रौ व्याख्याय सायणाचार्येण *मायैव जगदाकारेण विवर्तते,* तादृश्या मायाया आधारत्वेनासङ्गादपि ब्रह्मणः सर्वस्यापि वस्तुजातस्योत्पतिर्भवतीति वर्णितम्। *नासदासीन्नो सदासीत्* ... (ऋग्वेदः , १० : १२९ : १ ) इत्यत्र प्रलयावस्था निरूपितास्ति। प्रलयदशायाम् असत्, सत्, रजः पृथ्व्यादिलोकाः, व्योम, ततः परस्ताद् द्युलोकप्रभृतिसत्यलोकपर्यन्ता लोकाः, ब्रह्माण्डं, तदावरणं, अम्भः, जीवाश्च नासन् इत्यर्थापयता भाष्यकृता सायणेन 'परिशेषान्मायाया एवात्र सत्त्वं निषिध्यते' इति प्रतिपादितम्। तथा च *मायाया अनित्यत्वं* सङ्केतितं तेन। *न मृत्युरासीदमृतं न तर्हि... स्वधया तदेकम्...* (ऋग्वेदः , १० : १२९ : २ ) इत्यत्र सायणेन 'स्वस्मिन् धीयते ध्रियत आश्रित्य वर्तत इति स्वधा माया' इति स्वधाशब्दस्य मायावाचकत्वमुक्त्वा प्रलयसमये ब्रह्ममाययोरैक्यमासीदित्युक्त्वा प्रलयकाले माया ब्रह्मणि लीयत इति प्रतिपादितम्।

**उपनिषत्सु मायावर्णनम्**

उपनिषत्सु मायाविषये चर्चा प्राप्यते। तत्र मायाशक्त्यैवेश्वरः सृष्टिं करोतीत्युच्यते। उक्तञ्च —
*अस्मान्मायी सृजते विश्वमेतत् तस्मिँश्चान्यो मायया सन्निरुद्धः* ( श्वेता. उ. ४।९) *मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्* ( श्वेता. उ. ४।१०) इति। उक्तश्रुत्यनुसारेण मायापदेन प्रकृतिर्बोध्यते, तस्याः स्वामी च भगवानस्ति।

**पुराणेषु मायावर्णनम्**

विभिन्नेषु पुराणेषु मायाविषये चर्चा कृता प्राप्यते। मायेशो भगवान् नारायणः स्वकीयया मायया सृष्टिस्थितिसंहारकार्यं करोतीति पुराणेषु वर्णितं प्राप्यते। मायासम्बद्धाः प्रतिनिधिपुराणमान्यताः प्रस्तूयन्ते।

**ब्रह्मवैवर्तपुराणे मायावर्णनम्**

ब्रह्मवैवर्तपुराणे मायायाः परिभाषोक्ता। तत्पुराणानुसारेण— 'मा'शब्दः श्रीवाचको मोक्षवाचकश्च। 'या'शब्दश्च प्रापणार्थकः , अत एव या श्रीं (वैभवं) मोक्षं च यापयति = प्रापयति, सा 'माया' कथ्यते । एतावता— या शक्तिराजीवनं वैभवं, जीवनान्ते मोक्षञ्च प्रददाति, सा मायेति ब्रह्मवैवर्तपुराणप्रदत्ता मायापरिभाषास्ति (ब्र.वै.पु.श्रीकृष्णजन्मखण्डः, २७:२७–२८)। ब्रह्मवैवर्तपुराणे मायापदेन नाविद्या बोधिता, अविद्यया मोक्षप्राप्तेरसम्भवात्, किन्तु प्रज्ञा महालक्ष्मीमहाकालीमहासरस्वत्यस्तत्र मायाशब्देन सङ्केतिताः।

**श्रीमद्भागवतमहापुराणे मायावर्णनम्**

श्रीमद्भागवतमहापुराणे द्वितीयस्कन्धस्य पञ्चमाध्याये, तृतीयस्कन्धस्य पञ्चमाध्याये दशमस्कन्धस्य प्रथमाध्याये च मायाविषयिणी चर्चा प्राप्यते। निरस्तनिखिलहेयगुणः त्रिगुणातीतो वा, अत एव च निर्गुणपदवाच्यः परमात्मा स्थितिसर्गनिरोधरूपं कार्यार्थं सत्त्वं रजस्तम इति प्रकृत्यपरनाम्न्या मायायाः गुणत्रयं स्वीकरोति। सत्त्वं रजस्तम इति प्रकृतेर्गुणैर्युक्तः परमपुरुष एव स्थितिसर्गनिरोधानां कृते हरिविरञ्चिहरेतिसंज्ञया युक्तः सन् त्रिधा भवति (श्रीमद्भागवतम् , १:२:२३)। तद्वर्णनप्रसङ्गे प्रकृतिशब्दः प्रयुक्तो न मायाशब्दः। शब्दौ चैतौ पर्यायवाचिनौ, तत्रैव श्रीमद्भागवतेऽपरप्रसङ्गे सत्त्वरजस्तमसां मायागुणत्वेन वर्णनात्। स भगवान् स्थितिसर्गनिरोधरूपकार्यं कर्तुं मायया सह सत्त्वरजस्तमोरूपान् गुणान् गृह्णाति। स हि मायी। मायातीतः प्राकृतिकहेयगुणमुक्तः सन्नपि मायासञ्चालकः परमात्मा कार्य–कारण–कर्तृत्वत्वेन मायासंनिरुद्धदृशां दृष्ट्यां द्रव्यज्ञानक्रियाश्रयैः तैगुणैर्बद्ध इवाभाति। उक्तञ्च—

*सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः*

*स्थितिसर्गनिरोधेषु गृहीता मायया विभोः।*

*कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः*

*बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः (श्रीमद्भागवतम् , २:५:१८–१९)*

परमात्मा सर्वमपि कार्यं मायासहयोगेन करोतीति मायिनः सहैव मायाया महत्त्वमप्यस्ति। मायायाः कारणादेव जनाः परमात्मानं ज्ञातुं न शक्नुवन्तीत्येतत्तु मायाया विशेषता।

श्रीमद्भागवतमहापुराणे दशमस्कन्धस्य प्रथमाध्यायेऽपि श्रीकृष्णावतारोपक्रमवर्णनप्रसङ्गे मायायाः चर्चाऽऽगतास्ति। देवान् सम्बोधयता ब्रहमणा भूभारहरणाय भगवान् विष्णुः श्रीकृष्णरूपेणावतरिष्यति, शेषनागश्च तस्याग्रजरूपेणावतरिष्यतीत्युक्त्वा जगत्सम्मोहिनी विष्णुमाया प्रभुणादिष्टा सती यथोचितकार्यं विधातुं व्रजे जनिष्यतीत्युक्तमस्ति—

*विष्णोर्माया भगवती यया सम्मोहितं जगत्*

*आदिष्टा प्रभुणांशेन कार्यार्थे सम्भविष्यति (श्रीमद्भागवतम् , १०:१:२५)।*

दशमस्कन्धस्य द्वितीयाध्याये च भगवान् विष्णुः स्वकीयां योगमायां व्रजं गत्वा मथुराकारागारे स्थिताया देवक्या जठरे स्थितं गर्भं संनिकृष्य व्रजस्थिताया रोहिण्या उदरे संनिवेशयितुं, नन्दपत्न्यां यशोदायां कन्यारूपेण जनितुञ्च समादिशति। तया तथा कार्ये कृते भविष्यत्काले सर्वकामवरप्रदां तां जनाः 'दुर्गा–भद्रकाली–विजया, वैष्णवी–माया–नारायणीत्यादिभिर्नामभिर्ज्ञास्यन्ति, धूपोपहारबलिभिरर्चिष्यन्तीति चेति विष्णुना तदैवोक्तमिति वर्णितं दृश्यते। भगवता तथा समादिष्टा च योगमाया पृथ्वीं गत्वा तथैवाकरोदिति (श्रीमद्भागवतम् , १०:२:८–४१) तत्र वर्णितम्।

ईश्वरो मायायाः माध्यमेनैतज्जगत् निर्मितवान्। यदा एषा त्रिगुणमयी माया कालशक्त्या क्षोभं प्राप्ता, तदा चिन्मयः परमात्मा तस्यां स्वांशभूतपुरुषरूपेण चिदाभासरूपं बीजं स्थापितवान्। अथ कालप्रेरणया सा माया

महत्तत्त्वमजनयत्। तत एव क्रमशोऽहंतत्त्वात्पृथिवीपर्यन्तं जगत् समजायत। इत्थं मायासहयोगेनैव परब्रह्म परमात्मा जगत्सृष्टिस्थितिसंहाररूपां लीलां करोतीति श्रीमद्भागवते वर्णितम् (श्रीमद्भागवतम् , ३:५:२२–३५)।

### विष्णुपुराणे माया

विष्णुपुराणे पञ्चमांशस्य त्रिंशाध्याये मायाविषये चर्चा कृता प्राप्यते। बहुकालं तपस्तप्त्वा विष्णुं प्रसादितवती देवमाताऽदितिर्विष्णुदर्शनं प्राप्यापि, अभिलषितवरदानार्थमाविर्भूतं विष्णुं पुरतो दृष्ट्वापि विष्णुमायाविमोहिता सती मोक्षदात्रा विष्णुना सह मोक्षमयाच्य पुत्रं याचितवती। सा स्वयमेवात्मानं विष्णुमायाविमोहितास्मीति स्वीकरोति। तदा तया विष्णुमायाया विषये, तस्याः शक्तिविषये च चर्चा कृतास्ति ( विष्णुपुराणम् , ५ : ३० : १४–१९)।

### वराहपुराणे विष्णुमाया

वराहपुराणे 'मायाचक' नामके पञ्चविंशत्यधिकशततमेऽध्याये मायाविषये सुविशदा चर्चा कृता प्राप्यते। तत्र हि— विष्णु–भूमिसंवादरूपेण एकाशीत्यधिकैकशतेन श्लोकैः विष्णुमायाया वर्णनं कृतम्। तत्र हि विष्णोश्शक्तिरेव मायेति वर्णितम्। विष्णुमाययैव जगदिदं सृष्टं, तयैव पालितं, सञ्चालितम्, तयैव चान्ते संह्रियते, सर्वे ग्रहनक्षत्रादयो विष्णुमाययैव चलन्ति, पञ्चमहाभूतानि तयैव तिष्ठन्ति चलन्ति च। संसारे या विचित्रतास्ति, सा विष्णुमायैवास्ति। विचित्रघटनात्मिका मायेति तत्सारः (वराहपुराणम, १२५: ५–१७४)।

### दुर्गासप्तसत्यां माया

दुर्गासप्तसती मार्कण्डेयपुराणान्तर्गतः प्रसिद्धो ग्रन्थः। तद्ग्रन्थानुसारेण माया बन्धमोक्षयोर्हेतुरस्ति। संसारस्थितिकारिणा महामायाप्रभावेण मानवाः ममतावर्ते मोहगर्ते निपातिताः भवन्ति। सा जगत्पतेर्हरेर्योगनिद्रा महामाया चास्ति, तयैव जगत् सम्मोह्यते। सा हि भगवती महामाया ज्ञानिनामपि चेतांसि बलादाकृष्य मोहाय प्रयच्छति। तयैव जगदेतच्चराचरं विसृज्यते। सैव च सर्वेश्वरेश्वरी संसारबन्धहेतुश्चास्ति। सैषा प्रसन्ना वरदा नृणां मुक्तये भवति, यतो हि सा मुक्तेर्हेतुभूता परमा सनातनी विद्यास्ति (श्रीदुर्गा सप्तशती , १ : ५३–५८ )। सा च जगन्मयी जगन्मूर्तिर्देवी यद्यपि नित्यैवास्ति, तथापि देवादीनां कार्यसिद्ध्यर्थं यदा यदाऽऽविर्भवति, तदा तदोत्पन्नेत्यभिधीयते (श्रीदुर्गा सप्तशती , १: ६४: ६६ ) इत्युक्त्वा दुर्गासप्तशत्यां देव्या महाकाली–महालक्ष्मी–महासरस्वतीस्वरूपाणामाविर्भावकथाः प्रस्तुताः। एतेन तत्र महामायाया महाकाल्यादिदेवीस्वरूपाणाञ्चाभेदः प्रदर्शितः। किञ्च दुर्गाष्टोत्तरशतनामसु 'विष्णुमाया' शब्दोऽप्यागच्छति (श्रीदुर्गा सप्तशती , २०७४ : ११ )। तेनापि तदेव प्रतिपाद्यते।

दुर्गासप्तशत्यनुसारेण यदा कल्पान्ते भगवान् विष्णुः शेषमास्तीर्य योगनिद्रामभजत्, तदा विष्णुकर्णमलोद्भूतौ मधुकैटभनामानौ घोरौ द्वावसुरौ बह्माणं हन्तुमुद्यतौ, तदा ब्रह्मा हरिं विबोधयितुं हरिनेत्रकृतालयां स्थितिसंहारकारिणीं विष्णोर्योगनिद्रां तुष्टाव। तेन तथा स्तुता तामसी देवी विष्णुनेत्रास्यनासिकाबाहुहृदयोरुभ्यः निर्गता, मधुकैटभौ च मोहितवती, तन्मुक्तो जनार्दनश्चोदतिष्ठत्, ताभ्यां युद्धं कृत्वा तौ हतवानिति वर्णितमस्ति। तत्र पितामहेन स्वकृतस्तुतौ

विष्णुनिद्रा, महाविद्या, महामाया, प्रकृतिः, गुणत्रयविभावनी इत्यादिनामभिर्विष्णोर्योगनिद्रा योगमाया वा सम्बोधिता। तत्र मायारूपया शक्त्यैव जगत्स्रष्टा विष्णुर्जगत् सृजति, पाति, संहरति चेत्युक्तम्। (श्रीदुर्गा सप्तशती, १ : ६६–१०४ )

पुरा महिषासुरपीडिता देवता यदा ब्रह्माणं पुरस्कृत्य शिवकेशवयोः शरणं गतास्तदा महिषासुरातङ्कं श्रुत्वा जातकोपयोः शिवकेशकयोर्वदनात् तेजो निश्चक्राम, तदैव ब्रह्मणः शक्रादीनां देवानाञ्च शरीरतो महत्तेजो निर्गतम्। समस्तदेवानां तेजोराशिर्यदैकत्वङ्गतं तदा सर्वदेवशरीरजं तत्तेजः नारीस्वरूपेण प्रकटितमभूत्, सैव देवी दुर्गासीत्, या महिषासुरं ससैन्यं हत्वा जगच्छान्तिमयं कृतवतीति श्रीदुर्गासप्तशत्यां वर्णितम् (श्रीदुर्गा सप्तशती, २ –३ अध्यायः )। उक्तवर्णनेन मायारूपशक्तिसमूह एव दुर्गादेवीति ज्ञायते।

शुम्भनिशुम्भकृतातङ्काज्जगद्रक्षितुञ्च तयोर्वधाय गौरीदेहान्महासरस्वतीरूपेण देवी पुनः समुद्भूताऽभवदिति वर्णितं प्राप्यते (श्रीदुर्गा सप्तशती , ४ :४१)। तत्र महासरस्वतीदेवीं प्रकटयितुञ्च शुम्भनिशुभातङ्कातङ्किता देवाः स्तुतिं कृतवन्तः। तत्र ते प्रकृतित्वेन, विष्णुमायात्वेन, बुद्धि–निद्रा–क्षुधा–शक्ति–क्षान्ति–जाति–लज्जा–शान्ति–श्रद्धा–कान्ति–लक्ष्मी–वृत्ति–स्मृति–दया–तुष्टि–मातृ–भ्रान्ति–चितीन्द्रियाधिष्ठात्रीत्यादिरूपेण च देवीं स्तुतवन्तः। बुद्धि–निद्रा–क्षुधादयोऽपि खलु प्रकृतेरेव स्वरूपाणि। एतेन माया नाम प्रकृतिरेव, सा एव ब्रह्मशक्तिर्यथावश्यकं भगवदिच्छया महाकाली–महालक्ष्मी–महासरस्वतीत्यादिरूपेण काले काले प्रकटयत्यात्मानमिति ज्ञापितं भवति।

इत्थञ्च मार्कण्डेयपुराणान्तर्गतो दुर्गासप्तशतीग्रन्थो हि विष्णुमाया, प्रकृतिः, दुर्गा–लक्ष्मी–सरस्वत्यादिदेव्यश्चाभिन्ना इति प्रतिपादयति। दुर्गासप्तसत्यनुसारेण माया बन्धमोक्षयोर्हेतुरस्ति। सामान्यतया सा संसारबन्धहेतुरस्ति, किन्तु समाराधिता प्रसन्ना च सती नृणां मुक्तये भवति, यतो हि सा मुक्तेर्हेतुभूता परमा सनातनी विद्यास्ति।

### व्याकरणदर्शने मायाविषयकं मतम्

व्याकरणदर्शने प्रसङ्गात् कुत्रचिच्छक्तिविषये कुत्रचिच्च मायाविषये चर्चा कृता प्राप्यते।

### भर्तृहरेर्वाक्यपदीये शक्तिचर्चा

भर्तृहरिणा स्वकीये वाक्यपदीयग्रन्थे मायाविषये प्रत्यक्षरूपेण चर्चा न कृता, माया शब्दोऽपि न प्रयुक्तः, किन्तु तेन शक्तिशब्दो बहुधा प्रयुक्तः। एकं सदपि ब्रहम शक्तिविशेषप्रयोगादनेकमिव प्रतिभाति, तच्च यद्यपि शक्त्यभिन्नं तथापि पृथगिव वर्तत इति तन्मतम्। उक्तञ्च—

*एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्*
*अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते। (वाक्यपदीयम् , ब्र. का. १ )*

अत्र शक्तिपदेनोक्ता मायैवेति वक्तुं शक्यते, ऋग्वेदादिषु शक्त्यर्थे मायाशब्दप्रयोगात्।

*अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः*
*जन्मादयो विकाराः षड् भावभेदस्य योनयः (वाक्यपदीयम् , ब्र. का. ३ )*

कालशक्तिरपि मायाशक्त्येवेति स्पष्टम्। इत्थञ्च मायाशक्त्यैव जन्मादयः षड् विकारा भवन्तीत्युक्तं भवति।

**मायाविषयकं नागेशमतम्**

नागेशेन वैयाकरणसिद्धान्तलघुमञ्जूषायां मायायाः चर्चा विहिता दृश्यते। मायाया एव वर्णनं नागेशस्य नोद्देश्यम्, अपितु शक्त्याश्रयनिरूपणप्रसङ्गे (नागेशभट्टः , २०४७:२६७—२६९), बौद्धार्थस्य वाच्यत्वनिरूपणप्रसङ्गे च तस्याश्चर्चा विहिता। तत्प्रसङ्गे च तेन कुत्रचित् 'माया'शब्दस्य, कुत्रचित् 'अध्यासः'शब्दस्य, कुत्रचिच्च 'अविद्या' शब्दस्य प्रयोगो विहितः। 'वासुदेवः सर्वम्' ( नागेशः ,२०४७: ४४३) 'सर्वं खल्विदं ब्रह्म' ( नागेशः ,२०४७: ४६८) इत्यादिश्रुतिवाक्यान्युद्धरन्नागेशः सर्वमपि जगत् परब्रह्मवासुदेवशरीरमेव, स च सर्वजगदात्मा, देहादिप्रपञ्चे आत्मत्वभ्रान्तिरेवाविद्येति स्वीकरोति। अन्धकारमय्यविद्याकारणादेव च मूर्खजनाः सर्वात्मानं ब्रह्म न जानन्ति। उक्तञ्च—परमार्थसारस्थपद्यमुद्धरता नागेशेन—

*'एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या।*

*न विदन्ति वासुदेवं सर्वात्मानं जना मूढाः' इति (नागेशः , २०४७: ४४७)।*

'कुरुते सृष्टिमविद्या' (नागेशः , २०४७ : ४०२) इत्यत्र मायार्थेऽविद्याशब्दः प्रयुक्तः। इत्थञ्च 'अध्यासः', 'अविद्या' 'माया' इति च पर्यायशब्दा इति तेषामेकत्वमेवेति वैयाकरणसिद्धान्तलघुमञ्जूषा–पर्यालोचनेन ज्ञायते। 'सर्वज्ञं सर्वशक्तियोगं महामायं च तद्ब्रह्म' इति शारीरकभाष्यमुद्धरन्नागेशः शक्तिसमूहस्य महामायात्वं स्वीकरोति। (नागेशः , २०४७: ४५९) । अत्र तेन शक्तिर्माया महामाया चैकमेव तत्त्वमिति स्वीकृतम्।

**व्याकरणदर्शनानुसारेण सृष्टिप्रक्रियायां माया**

सृष्टिप्रक्रियायां मायाया महत्त्वपूर्णं स्थानमस्तीति प्रायः सर्वे दार्शनिकाः स्वीकुर्वन्ति। व्याकरणदर्शनेऽपि मतमिदं प्राप्यते। व्याकरणदर्शनानुसारेण हि प्रलये लीनसर्वजगत्का माया चेतने ईश्वरे लीयते। भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषावाविर्भवतः। ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते (नागेशभट्टः , २०४७:२६७—२६९)। मायाशक्त्यैवेश्वरः सृष्टिं करोतीति मन्यते।

**मायास्वरूपम्**

का नाम माया ? इत्यत्र दुर्बलाचार्येण वैयाकरणसिद्धान्तलघुमञ्जूषायाः 'कुञ्जिका' टीकायामुक्तम् – 'अद्वितीयस्य ब्रह्मणः क्रीडाया असम्भवात् इच्छोत्पद्यते, सैव माया' ( दुर्बलाचार्यः , २०४७ : २६९) इति। अद्वैतदर्शनप्रतिपादकेन शंकराचार्येण प्रभावितो नागेशो मायाया एव सृष्टिकर्तृत्वं स्वीकरोति। त्रिगुणात्मिका मायैव सर्वव्यापके नित्ये चेतनमये विष्णौ सृष्टिं करोति। तत्कृता चेयं सृष्टिर्वस्तुतो न सत्यम्, अपितु भ्रमरूपम्, अत एव मिथ्येति शंकरमतं नागेशः स्वीकरोति (नागेशभट्ट ,२०४७:४०२)। सृष्टेर्भ्रमरूपत्वं प्रतिपादयितुञ्च नागेशः परमार्थसारस्थपद्यमुद्धरति—

*'ज्वलनाद धूमोद्गतिभिर्विविधाऽऽकृतिरम्बरे यथा भाति,*

*तद्वद्विष्णौ सृष्टिः स्वमायया द्वैतविस्तरो भाति' (नागेशभट्टः, २०४७: ४०८) इति।*

अग्निप्रज्वलनसमयेऽग्नेरुत्पन्नेन धूमेन पुरोवर्त्याकाशेऽसत्यपि कस्मिँश्चित् यथा आकृतिर्नीलश्वेतरूपा भासते, तथैव विष्णौ तदीयमायया, सृष्टिर्नामरूपादिविस्तरा सत्त्व–स्थिरत्वादिरूपेण भातीत्यर्थः।

मायाविषयकं मतं प्रस्तुवन् नागेशः भागवतपद्यमुद्धरति –

*ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि*

*तद् विद्यादात्मनो मायां यथाऽऽभासो यथा तमः। (श्रीमद्भागवतम्, २ : ९ : ३३)*

असत्यपि वस्तुनि, आत्मरूपेऽधिष्ठाने किञ्चित्प्रतीयेत, सच्च वस्तु तत्रात्मनि न प्रतीयेत चेत् तथाऽसतः प्रतीतिः सतश्चाप्रतीतिरेवात्मनो मायां जानीयात्। यथा आभासो द्विचन्द्रादिः, असन्नप्याकाशे दृष्टिदोषकारणात् प्रतीयते, यथा च तमः = राहुः ग्रहमण्डले सन्नपि न प्रतीयते, तथैव सन्न प्रतीयतेऽसच्च प्रतीयते चेत् तथाऽसदर्थप्रकाशनमेव मायेति भावः (नागेशः, २०४७: ४१२)। नागेशप्रयुक्तस्य असदर्थप्रकाशनेति शब्दस्य च द्विधा विग्रहोऽर्थश्च। यथा— न सत् असत्, स चासौ अर्थः असदर्थः, तस्य प्रकाशनमिति प्रथमः प्रसिद्धश्च विग्रहः, असतोऽर्थस्य प्रकाशनमिति तदनुकूलोऽर्थः। सच्चासौ अर्थः सदर्थः, तस्य प्रकाशनं सदर्थप्रकाशनम्, न सदर्थप्रकाशनम् असदर्थप्रकाशनमिति द्वितीयो विग्रहः, सतोऽर्थस्याप्रकाशनमिति तदनुकूलोऽर्थः (त्रिपाठी., २०४७: ४१४)। इत्थञ्च— असदर्थप्रकाशनमेव मायेति सिद्ध्यति। उक्तार्थसमर्थनाय च नागेशेन बृहन्नारदीयपुराणोक्ता मायापरिभाषापि प्रस्तुता—

*'नासद्रूपा न सद्रूपा माया नैवोभयात्मिका*

*अनिर्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी' इति।*

एतद्व्याख्यानञ्च नागेशेनेत्थं कृतम्— व्यवहारकाले सत्त्वेन प्रतीतेर्न केवलमसद्रूपा। प्रतिक्षणं परिणामितया प्रतीतेर्बाधदर्शनाद् विशेषदर्शनबाध्यत्वाच्च न केवलं वास्तवसद्रूपा। अत एव वास्तवोभयरूपाऽपि न, विरोधाच्च। अत एवानिर्वाच्या सत्येवासत्येवेति निर्धार्य वक्तुमशक्या। तर्हि किमुभयविलक्षणा ? नेत्याह— मिथ्याभूता, प्रतिभासमात्रविषयत्वात्। सनातनी— भ्रमपरम्पराजनकपरम्पराक–वासनारूपेणेति। तस्मादारोपितं सत्त्वं परमार्थतस्त्वसत्त्वमित्येव युक्तम् (नागेशः, २०४७: ४१३)। अत्र नागेशेन 'मिथ्याभूता सनातनी' इत्युल्लिखितं किन्तु बृहन्नारदीयपुराणे तु तत्स्थाने 'भेदबुद्धिप्रदायिनी' इति प्राप्यते (बृहन्नारदीयपुराणम्, ३३ : ६९)

**मायाया जन्यात्वम्**

नागेशो मायाया जन्यात्वं साधयति। कुत्रचित्तन्नित्यत्वोक्तिस्त्वेतत्सृष्टौ तजजन्मानुपलम्भादेव। उपनिषद्भाष्ये 'अजाम्' इति श्रुतौ अजामित्यस्य यौगिकत्वेन जन्माभावपरतया व्याख्यानमप्येवमेव नेयम् (नागेशः, २०४७ : ४२५ )। वस्तुतो माया नाजा, किन्तु जन्यैव। इत्थञ्च मायाया जन्यात्वमिति व्याकरणशास्त्रीयं मतम्। अविद्यारूपायाः प्रकृतेर्मायापदबोध्यायाः जन्यात्वादेव विष्णुपुराण उक्तम्—

*'उत्पत्तिस्थितिनाशानामहेतुं हेतुमीश्वरम्*

*प्रजापतिपतिं विष्णुमनन्तमपराजितम्*

*प्रधानपुंसोरजयोः कारणं कार्यभूतयोः' (विष्णुपुराणम् , १:९:३६–३७) इति ।*

विष्णुर्हि चराचरजगत ईश्वरः, उत्पत्तिस्थितिनाशानां हेतुः, स्वयञ्चाहेतुः। अत्राहेतुशब्दे बहुव्रीहिः। नास्ति हेतुर्यस्य स इति। स च प्रजापतीनां स्वामी, सर्वव्यापकः, अनन्तोऽजेयश्च। स च कार्यरूपेण परिणतयोः प्रधानपुंसोः कारणमस्ति। प्रधानम् = मूलप्रकृतिः। अजयोरिति रूपकं स्वातन्त्र्यनिरासाय। तद्ध्वननायैव 'कारणं कार्यभूतयोरि'त्युक्तम् (नागेशः , , २०४७:४६२)। 'अजयो'रिति प्रधानस्य (प्रकृतेः) पुंसः (जीवस्य) च रूपकम्, अर्थात् प्रकृति–पुरुषयोः अजत्वधर्मस्य आरोपोऽस्ति, तस्यार्थः— प्रकृतिः जीवश्चेति उभावपि स्वतन्त्रौ न स्तः, यथा अजः (छागः) मुक्तो न तिष्ठति, किन्तु पाशेन बद्धस्तिष्ठति, तथैव प्रकृति–पुरुषावपि न स्वतन्त्रौ, किन्तु परमात्मपराधीनाविति भावः। 'कारणं कार्यभूतयोरि'त्यनेनापि तदेव कथ्यते। अथवा— अस्यां सृष्टौ जन्माभावात् प्रकृतिजीवौ अजौ, पूर्वकल्पे जातत्वात् 'कार्यभूतयोरि'त्युक्तम्। ब्रह्माण्डपुराणे तस्याः (मायाया) ब्रह्मणि लय उक्त इति ब्रह्माण्डपुराणस्योद्धरणं दत्तं नागेशेन–

*'स्थूलं विलाप्य करणे करणं निदाने*

*तत्कारणं करणकारणवर्जिते च*

*इत्थं विलाप्य यमिनः प्रविशन्ति यत्र*

*तं त्वां हरिं विमलबोधघनं नमामः' इति ।*

करणं =महदादि। निदानं = प्रकृतिः। तत्कारणं= प्रकृतिरूपकारणम्। करणकारणवर्जिते = ब्रह्मणि। ब्रह्मणः करणकारणवर्जितत्वकथनात् तदतिरिक्तस्य प्रकृत्यादेः करणकारणसाहित्यं सूचितम्। सकारणस्यानित्यत्वं सृज्यत्वञ्च सिद्ध्यत्येव। 'विलाप्य' इत्यनेन च प्रकृतेः समूलमुन्मूलनमुक्तम्। अत्र ब्रह्मणि लयोक्त्या तस्य (ब्रह्मणः) तदुपादानत्वम् (प्रकृत्युपादानत्वम्) उक्तम् । उपादानकारणे एव लयस्य 'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' (तैत्तिरीयोपनिषद् , ३: १) इति श्रुत्या बोधनात्। 'यस्य हि यत उत्पत्तिस्तस्य तत्र लयो न्याय्यो मृदीव शरावस्य। न च मनसो वागुत्पद्यते' इति शांकरभाष्याच्च (नागेशः, २०४७: ४६५)

नागेशोद्धृतब्रह्माण्डपुराणस्थश्लोके 'हरावेव सर्वेऽन्ततः प्रविशन्ति इत्युक्त्वा श्रीहरिर्नारायण एव परंब्रह्म, तस्मादेव जगदुत्पत्तिः, तस्मिन्नेव च जगल्लय इत्युक्तम्। अनेन प्रकृतिरूपा मायाऽपि तस्मादेव नारायणाज्जातेति सिद्ध्यति। एतावता वैयाकरणदार्शनिको नागेशोऽपि श्रीहरेर्नारायणस्यैव जगदुत्पत्तिस्थितिलयकारणत्वं सर्वशक्तिमत्त्वं, मायेशत्वं परब्रह्मत्वञ्चेति स्वीकरोतीति सिद्ध्ययति।

एतावता— नागेशमते माया अनिर्वाच्या, मिथ्याभूता, सनातनी चास्ति। त्रिगुणात्मिका मायैव सर्वव्यापके चेतनमये नित्ये विष्णौ सृष्टिं करोति। अन्यथाभानं कारयन्त्यविद्यैव परमात्मनि (ब्रह्मणि) जगदुत्पत्तिविनाशयोर्भ्रमं जनयति। वस्तुतो जगत्त्वेन भासमानमिदं सर्वमपि ब्रह्मैवेति नागेशमतम्। असदर्थप्रकाशनस्यैव मायात्वात् सा

सतोऽप्रकाशनमसतश्च प्रकाशनं करोति। मायाया ह्यारोपितमेव सत्त्वं परमार्थतस्त्वसत्त्वमेव, मिथ्यारूपत्वात्तस्याः। इत्थञ्च स्वयमसद्रूपाऽविद्याऽपरपर्याया माया सत्ये ब्रह्मणि मिथ्याभूतस्य जगतो भ्रमं सृजतीति नागेशमतम्। मायाया अपि कारणत्वाच्च श्रीहरिरेव जगदुत्पत्तिस्थितिलयपरमहेतुः, सर्वशक्तिमान्, मायेशः, परब्रह्म चेति नागेशः स्वीकरोतीति दृश्यते।

### विशिष्टाद्वैतदर्शने मायाविषयकं मतम्

विशिष्टाद्वैतदर्शने तत्त्वत्रयवादः स्वीक्रियते। चिदचिदीश्वररूपाणि त्रीणि तत्त्वानि तत्र स्वीकृतानि सन्ति। तत्र चिन्नाम जीवः, अचिच्च जडरूपा प्रकृतिः, यस्या अपरं नाम मायेति। अविद्या, प्रधानमित्यादीनि तस्याः नामान्तराणि। ईश्वरस्तु चिदचितोर्नियामकः। तत्राचिद्रूपा प्रकृतिः सत्त्वरजस्तमोगुणमयी वर्तते। इयञ्च सदा परिणमनशीला, घटपटादिरूपनानाप्रकारिका, तथाप्यस्याः मूलस्वरूपमेकं नित्यमव्यक्तञ्च। मायापरनाम्नी प्रकृतिः चतुर्विंशतिधा— पञ्चकर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, मन एकमिति एकादश इन्द्रियाणि। शब्दस्पर्शरूपरसगन्धसंज्ञकाः पञ्च तन्मात्राः, पृथिव्यप्तेजोवाय्वाकाशसंज्ञकानि पञ्च महाभूतानि, महत्, अहङ्कारः, मूलप्रकृतिश्चेति (नेपालो ऽन्ये च , २०७४:६८–७२)। इत्थञ्च विशिष्टाद्वैतदर्शने अचिद्रूपा त्रिगुणात्मिका प्रकृतिरेव माया, सा च जगदुदयस्थितिलयकर्तुः परब्रह्मणः श्रीहरेः शक्तिरूपा, तदीयकार्ये सहयोगिनी चेति मन्यते। विशिष्टाद्वैतदर्शने प्रसिद्धानां ग्रन्थानां मध्येऽत्र यतीन्द्रमतदीपिकायां गीताभाष्ये श्रीभाष्ये च प्राप्यमाणा मायाचर्चा प्रस्तूयते —

### यतीन्द्रमतदीपिकायां माया/प्रकृतिः

यतीन्द्रमतदीपिकायां श्रीनिवासाचार्येण सत्त्वरजस्तमोरूपगुणत्रयाश्रयरूपा प्रकृतिरेव मायेति निरूपितम्। अक्षरा–नित्याऽविद्या–मायादिशब्दवाच्यात्वेन च सा बोधिता। तस्या भगवत्सङ्कल्पाधीनगुणवैषम्यात् कार्योन्मुखावस्था अव्यक्तशब्देनोच्यते। अव्यक्तान्महानुत्पद्यते। सात्त्विकराजसतामसभेदात् महान् त्रिधा। महतोऽहङ्कार उत्पद्यते। सोऽपि सात्त्विकाहङ्कारो राजसाहङ्कारस्तामसाहङ्कारश्चेति त्रिविधो भवति। तत्र सात्त्विकाहङ्कारस्य नामान्तरं वैकारिक इति, राजसाहङ्कार एव तैजससंज्ञकः, तामसाहङ्कारश्च भूतादिपदेनापि बोध्यते। तेषु तैजससंज्ञकराजसाहङ्कारसहकृतात्सात्त्विकाहङ्कारादेकादशेन्द्रियाणि जायन्ते। राजसाहङ्कारसहकृताद् भूतादिसंज्ञकतामसाहङ्काराच्छब्दादिपञ्चतन्मात्राणि आकाशादीनि पञ्च महाभूतानि चोत्पद्यन्ते। तामसाहङ्काराकाशयोर्मध्यमावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम्। तस्मादाकाशो जायते। आकाशात् स्पर्शतन्मात्रम्। आकाशवाय्वोर्मध्यमावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम्। तस्माद्वायुः। वायुतेजसोर्मध्यमावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम्। तस्मात्तेजः। तेजस्सलिलयोर्मध्यमावस्थाविशिष्टं द्रव्यं रसतन्मात्रम्। तस्मादापः। अप्पृथिव्योर्मध्यावस्थाविशिष्टं द्रव्यं गन्धतन्मात्रम्। तस्मात् पृथिवी। भूतेषु सर्वत्र पञ्चीकरणप्रक्रियया शब्दादीनां गुणानामुपलम्भो भवति। इत्थमेव भगवत्सङ्कल्पेन प्रकृतेः तज्जन्येभ्यः पञ्चमहाभूतेभ्यश्च सृष्टिप्रक्रियाऽग्रे वर्धत इति

विशिष्टाद्वैतदर्शनसिद्धान्तः ( श्रीनिवासाचार्यः , १९८९ : ७२–८८) । एतन्मतमेव नेपालादिभिरनूद्य स्वकीयग्रन्थे प्रस्तुतम् ।

**गीतायां गीताभाष्ये च मायाविषये चर्चा**

श्रीमद्भगवद्गीतायां मायाविषये यत्रतत्र चर्चा कृता प्राप्यते। श्रीमता रामानुजाचार्येण च स्वकीये गीताभाष्ये मायाविषये मायास्वरूपविषये च वेदादिशास्त्रप्रमाणैः वर्णनं कृतम्। तत्र *'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया* (श्रीमद्भगवद्गीता , ४: ६)। इति श्लोकं व्याख्यायता तेन मायाशब्दार्थः सङ्कल्पो ज्ञानम् इच्छा चेति वर्णितम्। मायया = स्वेच्छया, आत्मीयेन ज्ञानेन, आत्मसंकल्पेनेति भावः। उक्तञ्च तेन—

...'स्वेच्छया सम्भवामि इत्यर्थः। ... आत्ममायया=आत्मीयया मायया। 'माया वयुनं ज्ञानम्' ( वेदनिघण्टुः, धर्मवर्गः, २२ ) इति ज्ञानपर्यायः अत्र मायाशब्दः। तथा च अभियुक्तप्रयोगः– 'मायया सततं वेत्ति प्राणिनां च शुभाशुभम्' इति। आत्मीयेन ज्ञानेन आत्मसंकल्पेनेत्यर्थः। अतः अपहतपाप्मत्वादिसमस्तकल्याण–गुणात्मकत्वं सर्वमैश्वरं स्वभावमजहदेव स्वमेव रूपं देवमनुष्यादिसजातीयसंस्थानं कुर्वन् आत्मसंकल्पेन देवादिरूपः सम्भवामि' (रामानुजाचार्यः , २०५० : १३९–१४० ) इति।

*त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः परमव्ययम्* (श्रीमद्भगवद्गीता , ७: १३) इति श्लोकं व्याख्यायता तेन हि ब्रह्मशरीरभूतं ब्रह्मात्मकं च चेतनाचेतनात्मकं कृत्स्नं जगत् ब्रह्मण एवोत्पद्यते, बह्म एवाधारीकृत्य तिष्ठति, ब्रह्मण्येव च प्रलीयते, तैरेव त्रिभिर्गुणमयैः निहीनतरैः क्षणविध्वंसिभिः पूर्वकर्मानुगुणदेहेन्द्रियभोग्यत्वेन अवस्थितैः पदार्थैः मोहितं देवतिर्यङ्मनुष्यस्थावरात्मनाऽवस्थितमिदं जगद् ब्रह्मतत्त्वं नाभिजानाति (रामानुजः , २०५० : २३७–२३८) इत्युक्तम्। तत्र तेन प्रत्यक्षरूपेण तु माया न व्याख्याता, तथापि त्रयाणां सत्त्वरजस्तमसां प्राकृतिकगुणानां कारणादेव देवमनुष्यादिरूपेणावस्थितं जगत् विमुह्य ब्रह्म नैव जानातीति चर्चितम्। मायाया अपरं नामैव प्रकृतिरिति। प्रकृतेरेव च ते त्रयो गुणाः। माययैव जगद् विमोहितमिति तदाशयः। *दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते* (श्रीमद्भगवद्गीता , ७: १४) इति श्लोकं व्याख्यायतोक्तं श्रीरामानुजाचार्येण—

'ममैषा सत्त्वरजस्तमोगुणमयी माया यस्माद् दैवी=देवेन क्रीडाप्रवृत्तेन मया एव निर्मिता तस्मात्सर्वैः दुरत्यया=दुरतिक्रमा। अस्याः मायाशब्दवाच्यत्वम् आसुरराक्षसास्त्रादीनाम् इव विचित्रकार्यकरत्वेन, यथा च— *'ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम्। आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम्। तेन मायासहस्रं तच्छम्बरस्याशुगामिना। बालस्य रक्षता देहमेकैकांशेन सूदितम्।'* (विष्णुपुराणम् , १।१९।१९–२० ) इत्यादौ। अतो मायाशब्दो न मिथ्यार्थवाची। तत्र मिथ्यार्थेषु मायाशब्दप्रयोगो मायाकार्यबुद्धिविषयत्वेन औपचारिकः, 'मञ्चाः क्रोशन्ति' इतिवत्। एषा गुणमयी पारमार्थिकी भगवन्माया एव 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' ( श्वेता० ४। १० ) इत्यादिषु अभिधीयते।

अस्याः कार्यं भगवत्स्वरूपतिरोधानं स्वस्वरूपभोग्यत्वबुद्धिश्च, अतो भगवन्मायया मोहितं सर्वं जगद् भगवन्तम् नाभिजानाति। मायाविमोचनोपायम् आह– परमकारुणिकम् अनालोचितविशेषाशेषलोकशरण्यं ये शरणं प्रपद्यन्ते, ते एतां मदीयां गुणमयीं मायां तरन्ति।' (रामानुजाचार्यः , २०५०: २३९–२४१) इति।

किमिति भगवदुपासनापादिनीं भगवत्प्रपत्तिं सर्वे न कुर्वन्ति ? इत्यत्र– *'न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः। माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः।* '(श्रीमद्भगवद्गीता , ७: १५) इत्युक्तम्। तत्र चतुर्विधेषु पापकर्मसु तृतीयप्रकारका जना माययाऽपहृतज्ञाना इति। तत्र हि माया जनानां ज्ञानमपहरतीति ज्ञापितम् (रामानुजाचार्यः , २०५०: २४२) इति।

### श्रीभाष्ये मायाचर्चा

भगवता श्रीरामानुजाचार्येण श्रीभाष्ये मायायाश्चर्चा विहिता दृश्यते। जिज्ञासाधिकरणे 'अथातो ब्रह्मजिज्ञासा' (ब्र.सू.१:१:१) इति सूत्रव्याख्यावसरे तेन माया ब्रह्मणः सहयोगिनीरूपेण/शक्तिरूपेण स्मृता दृश्यते। *'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः...* ' ( श्वेता. उ. ४।९) इति श्रुतिरुद्धृता तेन।

### व्याकरणविशिष्टाद्वैतदर्शनपुराणानां मायाविषयकमतसमन्वयः

पुराणेषु विष्णुशक्तित्वेन, प्रकृतित्वेन, देवीत्वेन च माया चर्चिता। व्याकरणदर्शने भर्तृहरिणा ब्रह्मशक्तिरेव स्मृता, या च मायात्वेन व्याख्यातुं शक्या। नागेशेन मायापर्यायत्वेन *'अध्यासः' 'अविद्या' 'महामाया'* इति शब्दानां प्रयोगो विहितः। *'वासुदेवः सर्वम्' 'सर्वं खल्विदं ब्रह्म'* इत्यादिश्रुतिवाक्यान्युद्धरन्नागेशः सर्वमपि जगत् परब्रह्मवासुदेवशरीरमेव, स च सर्वजगदात्मा, देहादिप्रपञ्चे आत्मत्वभ्रान्तिरेवाविद्येति स्वीकरोति। *'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'* इति श्रुतिं व्याख्यायता नागेशेन *'तद्विशिष्टस्यैव महेश्वरत्वात् '* इत्युक्त्वा ब्रह्मणः मायाविशिष्टत्वमुक्तम् (नागेशः , २०४७: ४५८)। *स्थूलं विलाप्य करणे... तं त्वां हरिं विमलबोधघनं नमामः* इति ब्रह्माण्डपुराणस्योद्धरणं ददता नागेशेन मायाया ब्रह्मणि लयो भवतीत्युक्तम्, ब्रह्म च हरिरिति स्वीकृतम् (नागेशः , २०४७: ४६५)। *प्रजापतिपतिं विष्णुमनन्तमपराजितम्, प्रधानपुंसोरजयोः कारणं कार्यभूतयोः* इति विष्णुपुराणस्योद्धरणं ददता नागेशेन विष्णुरेव कार्यभूतयोः चिदचितोः प्रधानपदवाच्ययोः प्रकृतेः / मायायाः, पुंसः, जीवस्य च कारणमिति स्वीकृतम्। ( नागेशः , , २०४७: ४६२) । नागेशेन 'अहं मम' इत्यध्यासस्याविद्यात्वं *'वासुदेवः सर्वम्'* इति ज्ञानस्य च विद्यात्वमुक्तम् ( नागेशः, २०४७: ४४३) । विशिष्टाद्वैतदर्शनेऽचिद्रूपा त्रिगुणात्मिका प्रकृतिरेव माया, सा च जगदुदयस्थितिलयकर्तुः परब्रह्मणः श्रीहरेः शक्तिरूपा, तदीयकार्ये सहयोगिनी चेति मन्यते। रामानुजाचार्येण स्वकीये गीताभाष्ये मायाशब्दार्थः सङ्कल्पो ज्ञानम् इच्छा चेति वर्णितम्। अतो भगवत्सङ्कल्परूपा, तज्ज्ञानरूपा तच्छक्तिरूपा च मायेति सिद्ध्यति। तद्दर्शने हि चिदचिद्विशिष्टस्य परवासुदेवस्य पुरुषोत्तमस्य परब्रह्मत्वं परमोपास्यत्वञ्च स्वीक्रियते। माया च भगवत्स्वरूपतिरोधानं कृत्वा स्वस्वरूपभोग्यत्वबुद्धिं जनयतीति मायामोहितं सर्वं जगद् भगवन्तम् नाभिजानाति।

इत्थञ्च वैयाकरणदार्शनिकेन नागेशेन ब्रह्मणः मायाविशिष्टत्वमुक्तम्, विशिष्टाद्वैतदर्शनेऽपि परब्रह्मणः श्रीहरेः परवासुदेवस्य चिदचिद्विशिष्टत्वमुक्तम्। तत्राचिद्रूपा त्रिगुणात्मिका प्रकृतिरेव मायेति परब्रह्मणो मायाविशिष्टत्वमुक्तम्। रामानुजाचार्येण स्वकीये गीताभाष्ये क्रीडाप्रवृत्तेन भगवता माया निर्मितेत्युक्तम्, नागेशेनापि मायाया ब्रह्मणि लयो भवतीत्युक्त्वा ब्रह्म च हरिरिति स्वीकृतम् । नागेशेन विष्णुरेव कार्यभूतयोः चिदचितोः प्रधानपदवाच्ययोः प्रकृतेः / मायायाः पुंसः जीवस्य च कारणमिति स्वीकृतम्, यच्च विशिष्टाद्वैतदर्शनसम्मतमेव। मायाऽनिर्वाच्यास्तीति नागेशः, विशिष्टाद्वैतदर्शनेऽपि मायाया दुरतिक्रमत्वमुच्यत इति द्वयोर्दर्शनयोर्मायाविषयकमतसमन्वयो भवति। ज्ञान–प्रज्ञा–शक्त्याद्यर्थेषु ऋग्वेदे मायाशब्दः प्रयुक्तो दृश्यते। उपनिषत्सु प्रकृतित्वेन सा परिभाषिता। पुराणैरपि मायायाः परब्रह्मश्रीहरेः शक्तित्वं प्रतिपादितं यच्च नागेशेनापि यत्रतत्रोद्धरणं गृहीत्वा समर्थितं, विशिष्टाद्वैतदर्शने त्वनुपदं तदेव प्रतिपादितमिति व्याकरण–विशिष्टाद्वैतदर्शनयोर्मतं वेदोपनिषत्पुराणादिसम्मतं परस्परं समन्वितं च दृश्यते।

इयाँस्तु विशेषः—नागेशमते माया मिथ्यास्ति (नागेशः, २०४७: ४१३) चेद् विशिष्टाद्वैतमते सा दुरतिक्रमैव, न मिथ्या। तन्मते हि चिज्जीवः, अचिन्माया (प्रकृतिः) ईश्वरश्चेति तत्त्वत्रयमपि सत्यम्। मायाविमोचनोपायत्वेन च भगवच्छरणागतिरेवेति विशिष्टाद्वैतदर्शने प्रतिपादितम्, यच्च व्याकरणदर्शने दृष्टिपथं न गच्छति, तस्य मोक्षसाधकदर्शनत्वाभात्।

## निष्कर्षः

व्याकरणदर्शने विविधदार्शनिकचिन्तनक्रमे मायाविषयकचिन्तनमप्यागतं दृश्यते। ब्रह्मज्ञानं विना जीवस्य कल्याणं नास्तीत्युच्यते, किन्तु मायामोहितो जीवो ब्रह्मज्ञानं कर्तुं न शक्नोति। अतो ब्रहमज्ञानावरोधिनी माया का ? कश्च तन्मुक्त्युपाय इति जिज्ञासापूर्त्यै शोधकार्यं कृत्वा लेखोऽयं निर्मितः।

तत्र ऋग्वेदे ज्ञान–प्रज्ञा–शक्त्याद्यर्थेषु मायाशब्दः प्रयुक्तो दृश्यते। अस्मान्मायी... मायां तु प्रकृतिम् इत्याद्युपनिषद्वचनान्माया नाम प्रकृतिरिति ज्ञायते।

ब्रह्मवैवर्तपुराणे प्रज्ञा देवी वा मायाशब्देन सङ्केतिता। श्रीमद्भागवतमहापुराणानुसारेण भगवान् स्थितिसर्गनिरोधरूपकार्यं कर्तुं मायया सह सत्त्वरजस्तमोरूपान् गुणान् गृह्णाति। स हि मायी (मायायाः स्वामी) अस्ति। मायातीतः प्राकृतिकहेयगुणमुक्तः सन्नपि मायासञ्चालको नारायणो जगत्पालनाय कालेकाले स्वमायां प्रयुङ्क्ते। विष्णुपुराणे अनात्मन्यात्मविज्ञानमेव मायेत्युक्तम्। वराहपुराणे विष्णुशक्तिरेव मायेति वर्णितम्। विष्णुमाययैव जगदिदं सृष्टं, तयैव पालितं, सञ्चालितम्, तयैव चान्ते संह्रियते सर्वे ग्रहनक्षत्रादयो विष्णुमाययैव चलन्ति, पञ्चमहाभूतानि तयैव तिष्ठन्ति चलन्ति च। संसारे या विचित्रतास्ति, सा विष्णुमायैवास्तीति वराहपुराणमतम्। मार्कण्डेयपुराणान्तर्गतो दुर्गासप्तशतीग्रन्थो हि विष्णुमाया, प्रकृतिः, दुर्गा–लक्ष्मी–सरस्वत्यादिदेव्यश्चाभिन्ना इति प्रतिपादयति। दुर्गासप्तशत्यनुसारेण माया बन्धमोक्षयोर्हेतुरस्ति। सामान्यतया सा संसारबन्धहेतुरस्ति, किन्तु समाराधिता प्रसन्ना च सती नृणां मुक्तये भवति, यतो हि सा मुक्तेर्हेतुभूता परमा सनातनी विद्यास्ति।

व्याकरणदर्शने भर्तृहरिणा स्वकीये वाक्यपदीयग्रन्थे मायाविषये प्रत्यक्षरूपेण चर्चा न कृता, माया शब्दोऽपि न प्रयुक्तः, किन्तु तेन शक्तिशब्दो बहुधा प्रयुक्तः। ऋग्वेदादिषु शक्त्यर्थे माया शब्दप्रयोगात्तेन शक्तिपदेनोक्ता मायैवेति व्याख्यातुं शक्यते।

नागेशेन वैयाकरणसिद्धान्तलघुमञ्जूषायां स्फोटनिरूपणप्रसङ्गे, बौद्धार्थस्य वाच्यत्वनिरूपणप्रसङ्गे च मायायाश्चर्चा विहिता। तत्प्रसङ्गे च तेन 'माया', 'अध्यासः', 'अविद्या' चेति शब्दाः पर्यायत्वेन प्रयुक्ताः। नागेशेन 'अहं मम' इत्याध्यासस्याविद्यात्वं *'वासुदेवः सर्वम्'* इति ज्ञानस्य च विद्यात्वमुक्तम्। असदर्थप्रकाशनस्यैव मायात्वात् सा सतोऽप्रकाशनमसतश्च प्रकाशनं करोति। मायाया ह्यारोपितमेव सत्त्वं परमार्थतस्त्वसत्त्वमेव, मिथ्यारूपत्वात्तस्याः। इत्थञ्च स्वयमसद्रूपाऽविद्याऽपरपर्याया माया सत्ये ब्रह्मणि मिथ्याभूतस्य जगतो भ्रमं सृजतीति नागेशमतं दृश्यते। नागेशेन मायास्वरूपवर्णनक्रमे मूलतः शंकराचार्यमतमनुसृतं दृश्यते, यतो हि तत्क्रमे तेनाधिकांशतया शंकराचार्यकृतपरमार्थसारस्थपद्यान्युद्धृतानि । नागेशमते माया अनिर्वाच्या, मिथ्याभूता, सनातनी चास्ति। त्रिगुणात्मिका मायैव सर्वव्यापके चेतनमये नित्ये विष्णौ सृष्टिं करोति। तत्कृता चेयं सृष्टिर्वस्तुतो न सत्यम्, अपितु भ्रमरूपम्, अत एव मिथ्येति नागेशाशयः।

*'वासुदेवः सर्वम्' 'सर्वं खल्विदं ब्रह्म'* इत्यादिश्रुतिवाक्यान्युद्धरन्नागेशः सर्वमपि जगत् परब्रह्मवासुदेवशरीरमेव, स च सर्वजगदात्मा, देहादिप्रपञ्चे आत्मत्वभ्रान्तिरेवाविद्येति स्वीकरोति। *'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'* इति श्रुतिं व्याख्यायता नागेशेन *'तद्विशिष्टस्यैव महेश्वरत्वात् '* इत्युक्त्वा ब्रह्मणः मायाविशिष्टत्वमुक्तम् (नागेशः , २०४७: ४५८)। *स्थूलं विलाप्य करणे... तं त्वां हरिं विमलबोधघनं नमामः* इति ब्रह्माण्डपुराणस्योद्धरणं ददता नागेशेन मायाया ब्रह्मणि लयो भवतीत्युक्तम्, ब्रह्म च हरिरिति स्वीकृतम् । (नागेशः , २०४७: ४६५) । *प्रजापतिपतिं विष्णुमनन्तमपराजितम्, प्रधानपुंसोरजयोः कारणं कार्यभूतयोः* इति विष्णुपुराणस्योद्धरणं ददता नागेशेन मायाया विष्णवधीनत्वमुक्तम्।

विशिष्टाद्वैतदर्शने तत्त्वत्रयवादः स्वीक्रियते। चिदचिदीश्वररूपाणि त्रीणि तत्त्वानि तत्र स्वीकृतानि सन्ति। अचिद्रूपा त्रिगुणात्मिका प्रकृतिरेव माया, सा च जगदुदयस्थितिलयकर्तुः परब्रह्मणः श्रीहरेः शक्तिरूपा, तदीयकार्ये सहयोगिनी चेति मन्यते। अक्षरा–नित्याऽविद्या–मायादिशब्दवाच्यात्वेन च सा बोधिता। रामानुजाचार्येण च स्वकीये गीताभाष्ये मायाशब्दार्थः सङ्कल्पो ज्ञानम् इच्छा चेति वर्णितम्। तन्मते मायाशब्दो न मिथ्यार्थवाची। क्रीडाप्रवृत्तेन भगवता माया निर्मिता, तयैव जगद् विमोहितमिति तन्मतम्। मायायाः कार्यमेव भगवत्स्वरूपतिरोधानं स्वस्वरूपभोग्यत्वबुद्धिश्च, अतो भगवन्मायया मोहितं सर्वं जगद् भगवन्तं नाभिजानाति। मायाविमोचनोपायञ्च भगवच्छरणागतिरेवेति तन्मतम्।

ज्ञानशक्त्याद्यर्थेषु ऋग्वेदे मायाशब्दः प्रयुक्तः। उपनिषत्सु प्रकृतित्वेन सा परिभाषिता। पुराणैरपि मायायाः परब्रह्मश्रीहरेः शक्तित्वं प्रतिपादितं यच्च नागेशेनापि यत्रतत्रोद्धरणं गृहीत्वा समर्थितं, विशिष्टाद्वैतदर्शने त्वनुपदं तदेव प्रतिपादितमिति व्याकरण–विशिष्टाद्वैतदर्शनयोर्मतं वेदोपनिषत्पुराणादिसम्मतं परस्परं समन्वितं च दृश्यते।

इत्थञ्च वेदोपनिषदादिवचनानुसारेण माया नाम भगवच्छक्तिविशेषोऽस्ति, यस्या नामान्तरं प्रकृतिरिति सिद्ध्यति। मायाशक्त्यैव च परब्रह्म सृष्ट्यादिकं करोति। ब्रह्मशक्तिभूता च माया जीवस्य कृते बन्धहेतुर्भवति। मायामोहितो जीवो स्वस्वरूपं परब्रह्मस्वरूपञ्च ज्ञातुं न शक्नोति, अत एव सदा भवबन्धनबद्धो भवति। माया चेश्वराधीनास्तीति मायाप्रभावादात्मानं विमोक्तुं भगवच्छरणागतिरावश्यकीति निष्कृष्यते।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भकृतिसूची

*ईशादि नौ उपनिषद्* (१९५१), गोरखपुर : गोविन्दभवन कार्यालय, गीताप्रेस।

उपाध्यायः, आचार्य बलदेवः (२०३५), वैष्णव सम्प्रदायों का साहित्य और सिद्धान्त, वाराणसी : चौखम्बा अमरभारती प्रकाशन।

ऋग्वेदसंहिता ( ई. १९३३), श्रीमत्सायणाचार्यविरचितभाष्यसमेता, प्रथममण्डलात्मकः प्रथमो भागः, पूना, भारतः : वैदिकसंशोधनमण्डलम्, तिलक–महाराष्ट्र–विद्यापीठम्।

ऋग्वेदसंहिता ( ई.१९३६), श्रीमत्सायणाचार्यविरचितभाष्यसमेता, २–५ मण्डलात्मको द्वितीयो भागः, पूना, भारतः : वैदिकसंशोधनमण्डलम्, तिलक–महाराष्ट्र–विद्यापीठम्।

ऋग्वेदसंहिता ( ई. १९४१), श्रीमत्सायणाचार्यविरचितभाष्यसमेता, ६–८ मण्डलात्मकस्तृतीयो भागः, पूना, भारतः : वैदिकसंशोधनमण्डलम्, तिलक–महाराष्ट्र–विद्यापीठम्।

ऋग्वेदः, श्रीमत्सायणाचार्यविरचितभाष्यसमेतः, १० मण्डलात्मको भागः, ऋग्वेदः –विकिस्रोतः https://sa.m.wikipedia.org

गौतम, प्रा. स्थानेश्वर(व्या)(२०७७) *वाक्यपदीय (ब्रह्मकाण्ड, स्फोटदर्शन*), सँस्कृत नेपाली हरिबोधिनी व्याख्यासहित, हेमन्तपुर दाङ : व्याख्याता स्वयम्।

दीक्षितः, भट्टोजिः (ई २००८), *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्, पु.मु.सं.), वाराणसी : चौखम्बा विद्याभवन।

दुर्बलाचार्यः(टी.) (२०४७) कुञ्जिका टीका, नागेशभट्टविरचिता *वैयाकरणसिद्धान्तलघुमञ्जूषा* ( प्रथमो भागः), वाराणसी : डा. हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

नागेशः (२०४७), *वैयाकरणसिद्धान्तलघुमञ्जूषा* ( प्रथमो भागः), वाराणसी : डा. हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

नेपाल, रघुनाथ, र अन्य (२०७८), *श्रीरामानुजाचार्य एवम् विशिष्टाद्वैत दर्शन* , श्रीवैष्णव युवा परिषद् नेपाल।

पतञ्जलिः (ई १९९५) *व्याकरणमहाभाष्यम्*, प्रथमनवाह्निकम्, दिल्ली : मोतीलाल बनारसीदास।

पाणिनिः (२०४७), *पाणिनीयसूत्रपाठः (अष्टाध्यायी* ), हरिवंशकुमारपाण्डेयः (सम्पा), वाराणसी : भारतीय विद्या संस्थान ।

बृहन्नारदीयपुराणम् (ई १९९५), पूर्वभागः , प्रयागः : हिन्दी साहित्य सम्मेलन

ब्रह्मवैवर्तपुराणम्/खण्डः ४(श्रीकृष्णजन्मखण्डः) /विकिस्रोतः https://sa.m.wikipedia.org

रामानुजाचार्यः (१९९१) *वेदार्थसङ्ग्रहः*, यादवाद्रि (मेलुकोटे) : संस्कृत–संशोधन–संसत् ।

रामानुजाचार्यः(१९९४) *शारीरकमीमांसाभाष्यम्*, ज्ञानगुदडी श्रीवृन्दावन मथुरा : पण्डित धनीराम शास्त्री ।

रामानुजाचार्यः (२०५०), *श्रीमद्भगवद्गीताभाष्य*, ( हिन्दी अनुवादसहितम्) , गोरखपुरम् : गीताप्रेसः।

*वेदान्त–दर्शन (ब्रह्मसूत्र*) (२०६०), गोरखपुर : गीताप्रेस।

शब्दकल्पद्रुमः, एन्ड्रोइडसंस्करणम् ।

श्रीनिवासाचार्यः (१९८९), *यतीन्द्रमतदीपिका*, वाराणसी : चौखम्बा–सुरभारती–प्रकाशनम्।

*श्रीमद्भगवद्गीता* (मूलमात्रम्) (२०७३), गोरखपुरम् : गीताप्रेसः।

*श्रीमद्भागवतमहापुराणम्* (२०५३), महर्षिवेदव्यासप्रणीतम्, गोरखपुरम् : गीताप्रेसः।

*श्रीविष्णुपुराणम्* (२०५१), गोरखपुरम् : गोविन्दभवन–कार्यालयः, गीताप्रेसः।